International Journal for Multidisciplinary Research (IJFMR)

E-ISSN: 2582-2160 ● Website: www.ijfmr.com ● Email: editor@ijfmr.com

# श्रीजीवन्यायतीर्थप्रणीते 'सारस्वतशतकम्' इति चित्रकाव्ये कविकल्पितनवीनबन्धद्वयसमीक्षा

**Dilruba Khandakar**

Assistant Professor, Department of Sanskrit, Dinabandhu Mahavidyalay, Bongaon, North 24 Parganas

**सारसंक्षेपः**

प्राचीनकालादारभ्य अत्याधुनिककालपर्यन्तं विविधवैचित्र्यैः मण्डितमिदं काव्यशास्त्रम्। संस्कृतालंकारशास्त्रे प्रायशो दृश्यते यच्चित्रकाव्यम् आलंकारिकैः तथा न समादृतं यथा समादृतमपरापरं पद्यकाव्यम्। अपि च, चित्रकाव्यमलंकारशास्त्रे अधमकाव्यरूपेण परिगण्यते। किन्तु चित्रकाव्येषु वर्ण्यविषयोपस्थापनाय कवीनां सुतरां प्रयासा दृश्यन्ते। अपरपक्षतः पाठकाः तच्चित्रकाव्यं पठित्वा चमत्कृतिम् अपि आस्वादयन्ति इति ध्रुवम्। श्रीजीवन्यायतीर्थः *सारस्वतशतके* विविधबन्धैः वैचित्र्यं प्रदर्शयति। अपि च, तत्र प्रतिपादितेषु विविधबन्धेषु ध्वनिवादस्य प्रतिध्वनिरपि श्रूयत इति तस्य काव्यस्य विशेषता।

चित्रकाव्ये विविधचित्रैः सह शब्दसन्निवेशकला निःसन्देहेन प्रशंसार्हा। इतोऽपि चित्रकाव्ये एकाक्षरबन्धस्य द्व्यक्षरबन्धस्य वा प्रयोगो यद्यपि काव्यस्य सुकुमारतां प्रायशः नाशयति, किन्तु तत्र शब्दप्रयोगस्य पाण्डित्यमपि नूनमेव स्वीकार्यम्। अतः अलंकारशास्त्रे चित्रकाव्यस्य महत्त्वं कीदृगस्तीति प्रतिपादयितुं तथा च आधुनिकसंस्कृतकाव्येषु श्रीजीवन्यायतीर्थस्य *सारस्वतशतकस्य* चित्रकाव्यत्वेन गुरुत्वं ख्यापयितुं प्रवृत्तोऽयं प्रबन्धः।

**कूटशब्दाः –** चित्रकाव्यम्, बन्धचित्रम्, महाकाव्यम्, कारयित्री प्रतिभा।

चित्रकाव्यस्य विकाशकालो मुख्यत आसीत् षष्ठ-सप्तम-शतकम्। आचार्यदण्डिनः समयकाले चित्रकाव्यस्य प्रसारः परिलक्षितः। दण्डिना विरचिते *काव्यादर्शे* इति ग्रन्थे बहुविधेन वैचित्र्येण चित्रकाव्यस्य स्वरूपम् उद्घाटितम्। संस्कृतालंकारिका वैचित्र्यम् एव अलंकाररूपेण स्वीकुर्वन्ति। काव्यप्रकाशकारः मम्मटः चित्रकाव्येषु शब्दचित्रं वाच्यचित्रं च स्वीकरोति। एवञ्च प्रबन्धस्य विषयभूतं चित्रं चित्रनामकालंकाररूपेण स्वीकृतम्।

संस्कृतसाहित्ये चित्रकाव्यरचनायाः परिसरे संस्कृतमहाकाव्येषु प्रथमं स्थानं वर्तते महाकविना भारविणा विरचितस्य *'किरातार्जुनीयम्'* इति महाभारतीयवनपर्वाश्रितस्य काव्यस्य। भारवेः समयकालः खृष्टीय-षष्ठ-शताब्द्याः पूर्वमिति मन्यते। अलंकारशास्त्रे चित्रकाव्यरचनाया विवेचनम् आदौ आचार्येण दण्डिना तदीये 'काव्यादर्श' इति अलंकारग्रन्थे कृतम्। एतदर्थं *किरातार्जुनीयम्* इति महाकाव्ये पञ्चदशतमे सर्गे वर्णितेन चित्रबन्धेन सह काव्यादर्शे विवेचितस्य चित्रबन्धस्य सादृश्यं परिलक्ष्यते। पञ्चदशतमे सर्गे 'न'कारम् अधिकृत्य एकः श्लोको रचितः। तत्र गोमूत्रिकाबन्ध-सर्वतोभद्र-अर्धभ्रमकादि-चित्रबन्धा अपि नयनयोः पान्थायन्ते। काव्यादर्शे यथा –

**'स्वरचित्रं, स्थानचित्रं, वर्णचित्रं गोमूत्रिकाचित्रम्, अर्धभ्रमचित्रं वर्णचित्रं प्रभृतीनि चित्राणि उल्लिखितानि।'**[1] इति।

'किरातार्जुनीयम्' इति महाकाव्ये –

**'एकाक्षरचित्रं द्व्यक्षरचित्रम् एकाक्षरपादचित्रं चतुरक्षरचित्रं निरोष्ठचित्रं गोमूत्रिकाचित्रं सर्वतोभद्रचित्रञ्च प्रभृतीनि चित्राणि रचितानि सन्ति।'**[2] इति।

एतानि सर्वाणि चित्राणि दण्डिकृते काव्यादर्शे उल्लिखितानि सन्ति। एतद्विहाय भारविः –

**'पादप्रतिलोमानुलोम-अर्धप्रतिलोमानुलोम-श्लोकप्रतिलोमानुलोम-समुद्गक-प्रभृतीनां चित्राणां वर्णनं कृतवान्।'**[3] **इति।**

सप्तमशताब्द्याः महाकविना माघेन विरचितस्य 'शिशुपालवधम्' इति महाकाव्ये एकोनविंशतितमे सर्गे विविधानि चित्राणि निर्मितानि सन्ति। तद्यथा –

**'एकाक्षर-द्व्यक्षर-एकाक्षरपाद-चतुरक्षर-निरोष्ठ-अतालव्य-गूढचतुर्थ-गोमूत्रिका-सर्वतोभद्र-अर्धभ्रम-मुरजबन्ध-कविकाव्यनामांकचक्रबन्ध-पादप्रतिलोमानुलोम-श्लोकप्रतिलोमानुलोम-श्लोकान्तरप्रतिलोमानुलोम-समुद्गकनामधेयानि।'** [4] **इति।**

चित्ररचनायाम् आकारचित्रस्य तथा बन्धचित्रस्य उद्भावने 'शिशुपालवधम्' इति महाकाव्यस्य गुरुत्वपूर्णं महत्त्वमस्ति। मुरजचक्रबन्धैः माघेन आकारचित्रस्य प्रारम्भः कृतः। एवं स चक्रबन्धेन आत्मकृतिमङ्किकतवान्। चक्रबन्धस्य तृतीयपञ्चमवलयोः विन्यस्तवर्णपाठेन स्पष्टीयते यत् - **'माघकाव्यमिदं शिशुपालवधम्'**[5] इति गर्भाङ्कम्। काव्येऽस्मिन् मुरजबन्धस्य लक्षणविषये मल्लिनाथेन तदीयायां टीकायाम् उक्तं यत् –

**"तिर्यग्रेखा लिखेत्पञ्च नवोर्ध्वास्तत्र पङ्क्त्यः।**

**अष्टकोष्टाश्चतस्त्रः स्युस्तत्र श्लोकं लिखेत् क्रमात्।"**[6] इति।

माघकृतस्य मुरजबन्धस्य श्लोकः प्रमाणरूपेण उल्लिखितः –

**"सासेनागमनारम्भे रसेनासीदनारता।**

**तारनादजनामत्त धीरनागमनामया।।"**[7] इति।

श्रीहर्षस्य नैषधीयचरिते चित्रकाव्यस्य एक एव श्लोकः अस्ति। परन्तु तस्य कवेरेव अन्यस्मात् श्लोकात् स्पष्टं भवति यत् तस्मिन् युगे चित्रश्लोकसृष्टिः कियती प्रचलिता आसीत्। नैषधीयचरितस्य भाष्यकारः चरित्रवर्धनः स्वस्य तिलकभाष्यस्य प्रारम्भे लिलेख यत् –

[1] *काव्यादर्शः*, परि. ३, श्लोकसंख्याः ७३-७७
[2] *किरातार्जुनीयम्*, सर्ग. १५, श्लोकाः ५, ७, १२, १४, २१, २५, ३८
[3] *किरातार्जुनीयम्*, सर्ग. १५, श्लोकाः १८, २०, २२, ५०
[4] *शिशुपालवधम्*, सर्ग. १९, श्लोकाः ३, १०, २०, २७, ३४, ४०, ४६, ६६, ७२
[5] तत्रैव, श्लोकः १२०
[6] तत्रैव, पृ. ४७४
[7] *शिशुपालवधम्*, पृ. ४७४

**“अत्र हर्षः यमक-मुरज-सर्वतोभद्रादि-अर्थं पुष्टयन्तः मुख्यबन्धनानि अवहेलयित्वा अधिकतया शब्दस्य योजनां कृतवान्।”**[8] इति।

अत्र श्रीहर्षो यमकमुरजसर्वतोभद्रप्रमुखान् अर्थपुष्टिकरान् बन्धान् अनादृत्य अनुप्रासादीन् शब्दालंकारान् प्रायः प्रयुयुजे इति चरित्रवर्धनविरचिता तिलकव्याख्या। परन्तु हर्षः निम्नलिखिते श्लोके ‘बिन्दुच्युतक’ इत्यस्य उल्लेखं तादृशे सन्दर्भे तथा च आदरपूर्वकं कृतवान् यत् चित्रं प्रति तस्य किमपि दुर्मतं न दृश्यते। नलस्य कथनम् अस्ति -

**“चकास्ति बिन्दुच्युतकातिचातुरी**
**घनाश्रुबिन्दुस्रुतिकैतवात्तवे।**
**मसारताराक्षि ससारमात्मना**
**तनोषि संसारमसंशयं यतः।।”**[9] इति।

षष्ठशताब्द्यां रचितेषु अन्येषु केषुचित् ग्रन्थेषु अपि ‘चित्र’ इत्यस्य कतिपयानि रचनानि प्राप्यन्ते। प्रवरसेनेन लिखिते ‘सेतुबन्ध’ इत्याख्ये प्राकृतमहाकाव्ये यद्यपि सरलचित्ररचना लक्षिता न सन्ति, परन्तु प्राकृतभाषायाः प्रकृतेः कारणात्, श्लोकप्रचुरतायाश्च कारणात् ‘त्रिस्वर’-‘चतुस्वर’-चित्राणाम् उदाहरणानि प्राप्यन्ते। पुस्तकस्य श्लोकप्रवृत्तिभ्यस्तत्खलु स्पष्टं भवति। अस्यैव नवमे अध्याये ‘यमक’ इत्यस्य सुचिन्तितया प्रयोगः स्वरचनायां कृतः। तस्य श्लोकत्रयेषु ‘पदावृत्तियमक’ इत्यस्य उदाहरणानि अपि प्राप्यन्ते।

अस्मिन् क्रमे दण्डिना प्रणीतस्य ‘दशकुमारचरितम्’ इति गद्यकाव्यस्य नाम अधिकं उल्लेखनीयम् अस्ति। यस्यैकः सम्पूर्णः अध्यायो निरोष्ठवर्णविशिष्टः। प्रियदन्तैः अधोष्ठक्षतिकारणात् ओष्ठक्षराणाम् उच्चारणं कर्तुम् असमर्थः मन्त्रगुप्तः सम्पूर्णं भाषणं निरोष्ठ्यम् एव प्रयच्छति। एवं प्रकारेण चित्रकौशलेन सह दण्डी परिस्थितेः आवश्यकताम् अपि मनसि स्थापयित्वा स्वकाव्यं रचयामास।आधुनिकसंस्कृतसाहित्ये साहित्यप्रवाहः सदा प्रवाहमानः। पौनःपुन्येन स प्रवाहो नूतनं नूतनं मार्गमाश्रित्य स्वसुरभिं सञ्चारयति। अस्मिन् प्रसङ्गे कविरविणा माघेनोदितं यत् –

**‘क्षणे क्षणे यन्नवतामुपैति तदेव रूपं रमणीयतायाः।’**[10] इति।

आधुनिकसंस्कृतसाहित्यस्य परिधिः विशालः व्यापकः सर्वाङ्गीणश्च। बहुसंस्कृतानुरागिनः पण्डिताः सन्ति येषाम् अक्लान्तपरिश्रमेण एवं च आन्तरिकानुरागेण संस्कृतसाहित्यमद्यावधि प्रवाहितं भवति। विंशशताब्द्याः कविना श्रीजीवन्यायतीर्थमहोदयेन प्रणीतं ‘सारस्वतशतकम्’ इति चित्रकाव्यं सदपि कथं कविप्रतिभाबलेन उत्तमकाव्यस्य मर्यादां लब्धवदिति नितरामेव विचारपदवीमधिरोहति।

ऊनविंश-विंशैकविंशशतकेषु अर्वाचीनकविभिः विरचितानि चित्रकाव्यानि अधस्तात् उल्लिख्यन्ते –

| | कविः | काव्यम् |
|---|---|---|
| १. | रजनीकान्तसाहित्याचार्यः (१८६९ - १९२१) | *चट्टविलापम्* |
| २. | गङ्गाधरकविराजः (१७१८ - १८८५) | *हर्षोदयम्* |

8 *नैषधीयचरितम्*, पृ. २ (पादटीप्पणी)
9 *नैषधीयचरितम्*, सर्गः ९, श्लोकः १०४
10 *शिशुपालवधम्*, सर्ग. ४, श्लोकः १३

| | | |
|---|---|---|
| ३. | रामरूपपाठकः (१९५०) | *चित्रकाव्यकौतुकम्* |
| ४. | श्री-अखिलानन्दशर्मा (१९५०) | *दयानन्ददिग्विजयम्* (महाकाव्यम्) |
| ५. | श्रीजीवन्यायतीर्थः (१८९३) | *सारस्वतशतकम्* |
| ६. | पण्डितदेवदत्तशर्मा (न ज्ञायते) | *बन्धरत्नाङ्कराम, लघुबन्धरत्नावली* |
| ७. | देवीप्रसादशुल्कः (१९७५) | *चित्रोपहारम्* |

महामहोपाध्यायः श्रीजीवन्यायतीर्थः संस्कृतसाहित्यजगति एकः सुप्रसिद्धः कविवरः अस्ति। स खलु पश्चिमवङ्गस्य उत्तरचब्बिशपरगणामण्डलान्तर्गतायां भट्टपल्ल्यां १८९२-ईशवीयाब्दस्य जनवरीमासस्य षड्विंशे दिनाङ्के (२६.०१.१८९२) अजायत। तस्य पितासीत् विंशशतकस्य अन्यतमः सुप्रसिद्धः मूर्धन्यः कविः तथा संस्कृतज्ञः पण्डितः पञ्चाननतर्करत्नमहोदयः। श्रीजीवन्यायतीर्थः सरस्वत्या वरपुत्रः अनन्तपुरुष इत्यादिभिर्विविधैर्विशेषणैर्विभूषितः अभवत्। स हि संकृतकाव्यजगति प्रख्यातकवित्वेन तथा च गवेषकरूपेण सश्रद्धं समादृतः। पितुः पञ्चाननतर्करत्नमहोदयस्य चतुष्पाठ्यां सुपद्मव्याकरणस्य अध्ययनेन श्रीजीवन्यायतीर्थस्य शिक्षाजीवनस्य प्रारम्भः अभवत्। प्रारम्भिकम् अध्ययनं समाप्य कलिकातानगरं प्रति प्रस्थानं कृतवान् सः। तत्र संस्कृतकलेजियेट्-विद्यालये बाल्यशिक्षां लब्धः। नवद्वीपस्य प्रसिद्धपण्डितस्य शिवनारायणस्य आत्मजस्य मन्मथनाथस्य तथा च पण्डितदेवेशचन्द्रस्य सकाशात् श्रीजीवेन विद्यार्जनं कृतम्। संस्कृतविभागे सुरेन्द्रनाथमहाविद्यालयाख्यात्प्रसिद्धप्रतिष्ठानात् स्नातकोपाधिं प्राप्य श्रीजीवः कलिकाताविश्वविद्यालयाच्च स्नातकोत्तरे प्रथमस्थानम् अधिकुर्वन् स्वर्णपदकेन सभाजितः। महामहोपाध्यायहरप्रसादशास्त्रिणां मार्गनिर्देशेन श्रीजीवः 'आधुनिकतर्कविज्ञानस्य क्रमविवर्तनम्' (Evolution of Modern Logic) इति शोधबन्धं विरच्य पि.एच्.डि.- उपाधिमधिगतवान्। न्यायसूत्रस्य प्राचीनत्वम् (Antiquity of Nyāya-sūtra) इति तत्प्रणीतः प्रबन्धश्च कलिकाताविश्वविद्यालयात् प्रकाशितः। कलिकाता-वर्धमानविश्वविद्यालयाभ्यां १९७२-ख्रीष्टाब्दे डि.लिटोपाधिना सम्मानितः अभवत्। कलिकाताविश्वविद्यालयस्य संस्कृतविभागे (१९३७-५८) अध्यापकरूपेण तथा च अन्तिमे यादवपुरविश्वविद्यालयस्य संस्कृतविभागे (१९५९-६८) अध्यापनं कृतवान्। १९६८-ख्रीष्टाब्दे भारतसर्वकारात् 'राष्ट्रपतिसम्मानं' प्राप्तवान्। दीर्घकालं यावत् भाटपाडासंस्कृतमहाविद्यालयस्य अध्यक्षपदे नियुक्तवान्। वेनारसहिन्दुविश्वविद्यालयेन सह तस्य संयोग आसीन्निविडः। महाकविः स्वीयजीवने नानाविधैः सम्माननैः भूषितः अभवत्। तेषु कानिचन यथा – काव्यव्याकरणतीर्थः, डि.लिटोपाधिः (कलिकाता-वर्धमानविश्वविद्यालयाभ्याम्), राष्ट्रपतिपुरस्कारः (भारतसर्वकारतः), महामहिमोपाध्यायोपाधिः (प्रयागस्थविद्वत्समाजपक्षतः), व्याकरणशिरोमण्युपाधिः (नवद्वीपविद्वत्समाजतः), देशिकोत्तमोपाधिः (विश्वभारतीविश्वविद्या-लयपक्षतः)। विविधैः पुरस्कारैः सम्मानितः श्रीजीवः प्रदेशेऽस्मिन् साहित्यसाधनां स्वकीयां प्रगुणीकृतवान्। तस्य श्रव्यकाव्यानि रूपकाणि विशेषेण प्रहसनानि साहित्यस्याभिनवान् मानदण्डान् स्थापयन्ति। श्रीजीवन्यायतीर्थमहोदयः संस्कृतं विहाय वङ्ग-हिन्दी-आङ्गलभाषास्वपि निपुण आसीत्। शतायुरयं महाकविः १९९२-संवत्सरे अक्टोवरमासस्य अष्टाविंशतितिदिनाङ्के इहलोकमत्यजत्।

तस्य सारस्वतविद्याधारा तु षष्टिः वर्षाणि यावत् प्रवाहिता निरवच्छिन्नरूपेण। तस्य बह्वीषु कृतिषु एकम् अन्यतमं खलु 'सारस्वतशतकम्' इति चित्रकाव्यम्। महामहोपाध्यायस्य श्रीजीवन्यायतीर्थस्य सारस्वतसाधना विमलप्रतिभायास्तत्त्वज्ञानसमृद्धायाः साक्ष्यमावहति नूनमेव। दशमशतकस्य संस्कृतालंकारिकाचार्यः राजशेखरस्तस्य 'काव्यमीमांसा' इति अलंकारग्रन्थस्य चतुर्थाध्याये प्रतिभायाः लक्षणमुल्लिलेख –

**'सा च द्विधा कारयित्री भावयित्री च। कवेरुपकुर्वाणा कारयित्री। साऽपि त्रिविधा। सहजाऽहार्यौपदेशिकी च। जन्मान्तरसंस्कारापेक्षिणी सहजा। जन्मसंस्कारयोनिराहार्या। मन्त्रतन्त्राद्युपदेशप्रभवा औपदेशिकी। भावकस्योपकुर्वाणा भावयित्री।'**[11] इति।

श्रीजीवन्यायतीर्थमहोदयस्य लेखन्याम् कारयित्री भावयित्री चेति प्रतिभाद्वयस्य सुस्पष्टः समन्वयो विराजते।

श्रीजीवमहोदयस्य रचितानां ग्रन्थानां तालिका अधस्तात् प्रदीयते –

**श्रव्यकाव्यानि -**

१. *पाण्डवविक्रमम्* (महाकाव्यम्)

२. *सारस्वतशतकम्* (चित्रकाव्यम्)

३. *ऋतुचक्रचङ्क्रमणम्* (गीतिकाव्यम्)

**दृश्यकाव्यानि –**

**क) नाटकानि -**

१. *महाकविकालिदासम्*

२. *साम्यसागरकल्लोलम्*

३. *श्रीशङ्कराचार्यवैभवम्*

४. *नागनिस्तारम्*

५. *स्वातन्त्र्यसन्धिक्षणम्*

६. *सिन्धुसौवीरसंग्रामम्*

७. *विवेकानन्दचरितम्*

८. *निगमानन्दचरितम्*

९. *श्रीकृष्णकौतुकम्*

**क) प्रकरणम् –**

१. *माधुरीसुन्दरम्*

**ख) भाणः -**

१. *विधिविपर्यासिम्*

२. *पुरुषपुङ्गवः*

**(घ) व्यायोगः**

१. *कैलासनाथविजयम्*

२. *गिरिधरसंवर्धनम्*

---

11 *काव्यमीमांसा*, पृ. १२

**(ङ) प्रहसनम् –** १. *विवाहविडम्वनम्*
२. *चण्डताण्डवम्*
३. *दरिद्रदुर्दैवम्*
४. *पुरुषरमणीयम्*
५. *क्षुतक्षेमीयम्*
६. *शतवार्षिकम्*
७. *चिपिटकचर्वणम्*
८. *रागविरागम्*

चित्रकाव्यस्य इतिहासे श्रीजीवन्यायतीर्थप्रणीतं 'सारस्वतशतकम्' इति चित्रकाव्यं संस्कृतसाहित्यभाण्डारे एकाविस्मरणीया सृष्टिः। 'सारस्वतशतकम्' इति चित्रकाव्ये प्रथमः चित्रबन्धो भवति - 'विद्याद्यविद्याश्लिष्टचित्रम्'। अष्टाधिकशतकं श्लोकैः निबद्धं षट्षष्टिसंख्यकैः बन्धचित्रैः सन्निवेशितं 'सारस्वतशतकम्' इति चित्रकाव्यम्। 'सारस्वतशतकम्' इति ग्रन्थे उल्लिखितानां चित्रबन्धानां नामानि अधस्तात् निर्दिश्यन्ते –

विद्याद्यविद्याश्लिष्टचित्रम्, स्वस्तिकाबन्धः, शङ्खबन्धः, वीणाबन्धः, मयूरबन्धः, घण्टाबन्धः, मुरजबन्धः, घटबन्धः, आसनबन्धः, पुस्तकबन्धः, हंसबन्धः, कङ्कनबन्धः, अक्षरमालाबन्धः, गोमुत्रिकाबन्धः, विमानबन्धः, धेनुबन्धः, वृक्षबन्धः, लताबन्धः, माल्यबन्धः, अश्वबम्धः, गजबन्धः, छत्रबन्धः चेत्यादयः।

श्रीजीवन्यायतीर्थविरचितस्य 'सारस्वतशतकम्' इति चित्रकाव्ये दृश्यते यत् उल्लिखितानि कतिपयानि चित्राणि कवेः पूर्ववर्तिकविभिः आलंकारिकैः च रचितेभ्यः चित्रेभ्यः गृहीतानि तथा च कतिपयानि चित्राणि कवेः स्वकल्पितानि। अथस्तात् कवेः स्वकल्पितानां चित्रबन्धानाम् उल्लिखो विधीयते –

**स्वस्तिकाबन्धः -**

श्रीजीवन्यायतीर्थेन कृतः एकः नवीनो बन्धः स्वस्तिकाबन्धः। प्रत्येकं शुभकर्मणि सर्वस्मिन् कार्यारम्भे घटादिषु स्वस्तिकाङ्कनं क्रियते। सारस्वतशतके स्वस्तिकाबन्धस्य प्रयोगः प्रथमतयोपलभ्यते। स्वस्तिकाबन्धस्य लक्षणविषये ग्रन्थकारेण उक्तं यत् – मध्ये श्लिष्टपदस्य वारत्रयं व्यवहारेण उभयपार्श्वे विन्यस्तानां पदानां सज्जीकरणेन च बन्धसुन्दरः स्वस्तिकाबन्धः सज्जायते। ग्रन्थकारेण अधस्तनेन श्लोकेन स्वस्तिकाबन्धस्य चित्रम् उपस्थापितम् –

**"तामहं तामसे चित्ते नित्यतामरसासनाम्**

**सारदा सारदज्योतिर्न संसारमथार्थये"**।। इति। ( सा. श. १४)

International Journal for Multidisciplinary Research (IJFMR)

E-ISSN: 2582-2160 ● Website: www.ijfmr.com ● Email: editor@ijfmr.com



अस्मिन् चित्रालंकारे वर्णानां सज्जीकरणं एवं भवति येन स्वस्तिकासादृश्यं प्रतीयते। वर्णानामुच्चारणगतिः कीदृशी भवेत् तस्याः स्पष्टीकरणेन चित्रबन्धस्य लक्षणं सञ्जायते। श्लोकेऽस्मिन् प्रथमपादान्तर्गतस्य आदौ 'ताम्' इति पदस्य वारत्रयमावृत्तिर्भवति। तथा हि प्रथमतः दक्षिणाभिमुखे 'तामहमि'ति उच्चारणं वामाभिमुखे 'तामसे' इति द्वितीयोच्चारणं पुनः 'हं' इति दलं विहाय दक्षिणाभिमुखे तामरसासनां तृतीयोच्चारणम्। एवं प्रकारेण श्लोकस्य द्वितीयपादेऽपि मध्यस्थस्य सारपददलस्य वारत्रयमुच्चारणं परिलक्ष्यते।

**शङ्खबन्धः -**

श्रीजीवन्यायतीर्थेन कृतः एकः नवीनो बन्धः शङ्खबन्धः। प्रतिशुभकार्यं गृहेषु सर्वदा उच्चशब्दजनकः शङ्खनादः श्रूयते। शङ्खबन्धस्य लक्षणविषये ग्रन्थकारेण उक्तं यत् – मुखाद् आरभ्य चरणपर्यन्तं प्रथमपादस्य उच्चारणमिति। पुनः चरणात् मुखपर्यन्तं शङ्खाकारे द्वितीयपादस्य पुनरावर्तनं, मध्ये तृतीयचतुर्थयोः वर्णानाम् अनुक्रमेणोच्चारणात् शङ्खबन्धः निर्मीयते। ग्रन्थकारेण अधस्तनेन श्लोकेन शङ्खबन्धस्य चित्रम् उपस्थापितम् –

**"भातु कापि ललिताकृतिः सिता तापहा प्रशमदीपिका तु भाः।**

**दीर्घदर्शिनैकतारका तारकान्तकलया लयादृता"**।। इति। (सा. श., १७)



अस्मिन् चित्रालंकारे वर्णानां सज्जीकरणं एवं भवति येन शङ्खसादृश्यं प्रतीयते। वर्णानामुच्चारणगतिः कीदृशी भवेदित्यस्याः स्पष्टीकरणेन चित्रबन्धस्य लक्षणं सञ्जायते। श्लोकेऽस्मिन् प्रथमपादस्य वर्णाः मुखादारभ्य अधोदेशपर्यन्तं पठनीयाः। तत्परं द्वितीयपादस्य वर्णा अधोदेशात् उपरिभागपर्यन्तं विन्यस्ताः सन्तः पुनः मुखभागे समायान्ति। तत उपरिभागतः तृतीयचतुर्थपादयोः वर्णाः क्रमशः अधोभागे सज्जीकृत्य तृतीयपादस्य अन्तिमाक्षरत्रयं चतुर्थपादस्य प्रथमाक्षरत्रयं च शङ्खस्य मध्यभागे तारकाचिह्नेन उपस्थाप्य उच्चार्यन्ते चेत् शङ्खबन्धः निर्मीयते। श्लोकेऽस्मिन् 'तार' इति शब्देन उच्चध्वनिः सूच्यते।

चित्रकाव्येषु वर्ण्यविषयोपस्थापनाय कवीनां सुतरां प्रयासा दृश्यन्ते। श्रीजीवन्यायतीर्थः *सारस्वतशतके* विविधबन्धैः वैचित्र्यं प्रदर्शयति। एवमेव 'सारस्वतशतकम्' इति चित्रकाव्ये कवेः स्वकल्पितचित्रबन्धद्वयमत्रालोचितं मयेति शिवम्।

**।। परिशीलिता ग्रन्थानुक्रमणिका ।।**

**संस्कृतग्रन्थग्रामाः**

भट्टाचार्यः, श्रीजीवः। *सारस्वतशतकम्*। कलिकाताविश्वविद्यालयः, कलिकाता, १९६५.

अप्पयदीक्षितः। *चित्रमीमांसा* । (सम्पा.) शिवदत्तः वासुदेवलक्षणशास्त्री-पणशीकरश्च, काव्यमाला - ३८, १९२६ (तृतीयसंस्करणम्).

दण्डी । *काव्यादर्शः* । प्रेमचन्द्रतर्कवागीशभट्टाचार्य-विरचित-मालिन्यप्रोञ्छनी टीकासहितः । (सम्पा.) चिन्मयी-चट्टोपाध्यायः। कलिकाता, पश्चिमवङ्ग राज्य पुस्तक पर्षद्, १९९५।

भारविः । *किरातार्जुनीयम्* । (सम्पा.) गुरुनाथविद्यानिधिभट्टाचार्यः । कलिकाता, छात्रपुस्तकालय, १३३३ (तृतीयसंस्करणम्)।

**आङ्गलभाषानिबद्धा ग्रन्थग्रामाः**

Chattopadhay, Rita. *20th century Sanskrit Literature: A Glimpse into Tradition and Innovation*. Kolkata, Sanskrit Pustak Bhandar, 2009.

---. *Modern Sanskrit Literature: Some Observations*, (DSA Sanskrit, Jadavpur University- Series), Kolkata, Sanskrit Pustak Bhandar, 2004.

Jha, Kalanath. *Figurative Poetry in Sanskrit Literature*. New Delhi: Motilal Banarsidass, 1975.

Mishra, Sampadananda and Vijay Poddar. *The Wonder that is Sanskrit*. Puducherry: Auropublications, 2002 (First Edition).

**हिन्दीग्रन्थः**

मिश्र, रामदीन। *चित्रकाव्य - सैद्धान्तिक विवेचन एवं ऐतिहासिक विकास*। पटना, बिहार-राष्ट्रभाषा-परिषद्, १९५९ (प्रथमसंस्करणम्)।